# Shri DakShinamurti Navaratnamalika Stotra

# શ્રીદક્ષિણામૂર્તિ નવરત્નમાલિકાસ્તોત્રમ્

## Document Information

Text title : Shri DakShinamurti Navaratnamalika Stotra

File name : daksh9.itx

Category : shiva, stotra

Location : doc_shiva

Author : Not known

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Description-comments : Hymn of 9 verses in praise of Dakshinamurti

Latest update : March 6, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિ નવરત્નમાલિકાસ્તોત્રમ્

॥ શ્રી દક્ષિણામૂર્તિ નવરત્નમાલિકા સ્તોત્રમ્ ॥

મૂલેવટસ્ય મુનિપુઙ્ગવસેવ્યમાનં
  મુદ્રાવિશેષમુકુલીકૃતપાણિપદ્મમ્ ।
મન્દસ્મિતં મધુરવેષમુદારમાદ્યં
  તેજસ્તદસ્તુ હૃદિ મે તરુણેન્દુચૂડમ્ ॥ ૧॥

શાન્તં શારદચન્દ્રકાન્તિધવળં ચન્દ્રાભિરમાનનં
  ચન્દ્રાર્કોપમકાન્તિકુણ્ડલધરં ચન્દ્રાવદાતાંશુકમ્ ।
વીણાપુસ્તકમક્ષસૂત્રવલયં વ્યાખ્યાનમુદ્રાંકરૈ-
  ર્બિભ્રાણં કલયે હૃદા મમ સદા
શાસ્તારમિષ્ટાર્થદમ્ ॥ ૨॥

કર્પૂરપાત્રમરવિન્દદળાયતાક્ષં
  કર્પૂરશીતલહૃદં કરુણાવિલાસમ્ ।
ચન્દ્રાર્ધશેખરમનન્તગુણાભિરામ-
  મિન્દ્રાદિસેવ્યપદપઙ્કજમીશમીડે ॥ ૩॥

દ્યુદ્રોધઃ સ્વર્ણમયાસનસ્થં
  મુદ્રોલ્લસદ્બાહુમુદારકાયમ્ ।
સદ્રોહિણીનાથકળાવતંસં
  ભદ્રોદધિં કઞ્ચન ચિન્તયામઃ ॥ ૪॥

ઉદ્યદ્ભાસ્કરસન્નિભં ત્રિણયનં શ્વેતાઙ્ગરાગપ્રભં
  બાલં મૌઞ્જિધરં પ્રસન્નવદનં ન્યગ્રોધમૂલેસ્થિતમ્ ।
પિઙ્ગાક્ષં મૃગશાવકસ્થિતિકરં સુબ્રહ્મસૂત્રાકૃતિમ્
  ભક્તાનામભયપ્રદં ભયહરં શ્રીદક્ષિણામૂર્તિકમ્ ॥

૫॥

શ્રીકાન્તદ્રુહિણોપમન્યુ તપન સ્કન્દેન્દ્રનન્ધ્યાદયઃ
  પ્રાચીનાગુરવોઽપિયસ્ય કરુણાલેશાદ્ગતાગૌરવમ્ ।
તં સર્વાદિગુરું મનોજ્ઞવપુષં મન્દસ્મિતાલઙ્કૃતં
  ચિન્મુદ્રાકૃતિમુગ્ધપાણિનળિનં ચિત્તં શિવં કુર્મહે ॥ ૬॥

કપર્દિનં ચન્દ્રકળાવતંસં
  ત્રિણેત્રમિન્દુપતિમાનનોજ્વલમ્ ।
ચતુર્ભુજં જ્ઞાનદમક્ષસૂત્ર-
  પુસ્તાગ્નિહસ્તં હૃદિ ભાવયેચ્છિવમ્ ॥ ૭॥

વામોરૂપરિસંસ્થિતાં ગિરિસુતામન્યોન્યમાલિંગિતાં
  શ્યામામુત્પલધારિણી શશિનિભાંચાલોકયન્તં શિવમ્ ।
આશ્લિષ્ટેન કરેણ પુસ્તકમધો કુંભં સુધાપૂરિતં
  મુદ્રાં જ્ઞાનમયીં દધાનમપરૈર્મુક્તાક્ષમાલાં ભજે
॥ ૮॥

વટતરુનિકટનિવાસં પટુતરવિજ્ઞાનમુદ્રિતકરાબ્જમ્ ।
કઞ્ચનદેશિકમાદ્યં કૈવલ્યાનન્દકન્દળં વન્દે ॥ ૯॥

ઇતિ શ્રી દક્ષિણામૂર્તિ નવરત્નમાલા સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

*Shri DakShinamurti Navaratnamalika Stotra*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*